# श्रीमद् भगवद् गीता Śrīmad Bhaga-vad Gī-tā
## Chapter 3 Verses 1 - 21

| | |
|---|---|
| ॐ हरिः ॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī gu-ru-bhyo na-maḥ |
| हरिः ॐ | hariḥ om |
| ॐ श्री कृष्णपरमात्मने नमः | om śrī kṛṣ-ṇa-pa-ra-māt-ma-ne namaḥ |
| श्रीमद् भगवद् गीता | śrīmad bha-ga-vad gī-tā |
| अथ तृतीयोऽध्यायः। | a-tha tṛ-tī-yo'dhyā-yaḥ ǀ |
| कर्मयोगः। | kar-ma-yo-gaḥ ǀ |

| | |
|---|---|
| अर्जुन उवाच। | arjuna u-vā-ca ǀ |
| ज्यायसी चेत्कर्मणस्ते | jyā-ya-sī cet-kar-ma-ṇas-te |
| मता बुद्धिर्जनार्दन। | ma-tā bud-dhir-ja-nār-da-na ǀ |
| तत्किं कर्मणि घोरे मां | tat-kiṁ kar-ma-ṇi gho-re māṁ |
| नियोजयसि केशव॥ ३-१॥ | ni-yo-ja-ya-si ke-śa-va ǀǀ 3-1ǀǀ |

| | |
|---|---|
| व्यामिश्रेणेव वाक्येन | vyā-mi-śre-ṇe-va vāk-ye-na |
| बुद्धिं मोहयसीव मे । | bud-dhiṁ mo-ha-ya-sī-va me । |
| तदेकं वद निश्चित्य | ta-de-kaṁ va-da niś-cit-ya |
| येन श्रेयोऽहमाप्नुयाम् ॥ ३-२ ॥ | ye-na śre-yo'ham-āp-nu-yām ।। 3-2।। |
| श्रीभगवानुवाच । | śrī bha-ga-vān-u-vā-ca । |
| लोकेऽस्मिन् द्विविधा निष्ठा | lo-ke's-min dvi-vi-dhā niṣ-ṭhā |
| पुरा प्रोक्ता मयानघ । | pu-rā prok-tā ma-yā-na-gha । |
| ज्ञानयोगेन साङ्ख्यानां | jñā-na-yo-ge-na sāṅ-khyā-nāṁ |
| कर्मयोगेन योगिनाम् ॥ ३-३ ॥ | kar-ma-yo-ge-na yo-gi-nām ।। 3-3।। |
| | |
| न कर्मणामनारम्भात् | na kar-ma-ṇām-anā-ram-bhāt |
| नैष्कर्म्यं पुरुषोऽश्नुते । | naiṣ-karm-yaṁ pu-ru-ṣo'ś-nu-te । |
| न च संन्यसनादेव | na ca san-nya-sa-nā-de-va |

| | |
|---|---|
| सिद्धिं समधिगच्छति ॥ ३-४ ॥ | sid-dhiṁ sa-ma-dhi-gac-cha-ti ꠰꠰ 3-4꠰꠰ |
| न हि कश्चित्क्षणमपि | na hi kaś-cit-kṣa-ṇam-api |
| जातु तिष्ठत्यकर्मकृत् । | jā-tu tiṣ-ṭhat-ya-kar-ma-kṛt ꠰ |
| कार्यते ह्यवशः कर्म | kār-ya-te hya-va-śaḥ kar-ma |
| सर्वः प्रकृतिजैर्गुणैः ॥ ३-५ ॥ | sar-vaḥ pra-kṛ-ti-jair-gu-ṇaiḥ ꠰꠰ 3-5꠰꠰ |
| कर्मेन्द्रियाणि संयम्य | kar-men-dri-yā-ṇi saṁ-yam-ya |
| य आस्ते मनसा स्मरन् । | ya ā-ste ma-na-sā sma-ran ꠰ |
| इन्द्रियार्थान्विमूढात्मा | in-dri-yār-thān-vi-mū-ḍhāt-mā |
| मिथ्याचारस्स उच्यते ॥ ३-६ ॥ | mith-yā-cā-ras-sa uc-ya-te ꠰꠰ 3-6꠰꠰ |
| यस्त्विन्द्रियाणि मनसा | yas-tvin-dri-yā-ṇi ma-na-sā |
| नियम्यारभतेऽर्जुन । | ni-yam-yā-ra-bha-te'r-ju-na ꠰ |

| | |
|---|---|
| कर्मेन्द्रियैः कर्मयोगम् | kar-men-dri-yaiḥ kar-ma-yo-gam |
| असक्तस्स विशिष्यते ॥ ३-७ ॥ | a-sak-tas-sa vi-śiṣ-ya-te \|\| 3-7\|\| |
| | |
| नियतं कुरु कर्म त्वं | ni-ya-taṁ ku-ru kar-ma tvaṁ |
| कर्म ज्यायो ह्यकर्मणः । | kar-ma jyā-yo hya-kar-ma-ṇaḥ \| |
| शरीरयात्रापि च ते | śa-rī-ra-yā-trā-pi ca te |
| न प्रसिद्ध्येदकर्मणः ॥ ३-८ ॥ | na pra-sid-dhye-da-kar-ma-ṇaḥ \|\| 3-8\|\| |
| | |
| यज्ञार्थात्कर्मणोऽन्यत्र | ya-jñār-thāt-kar-ma-ṇo'n-yat-ra |
| लोकोऽयं कर्मबन्धनः । | lo-ko-'yaṁ kar-ma-ban-dha-naḥ \| |
| तदर्थं कर्म कौन्तेय | ta-dar-thaṁ kar-ma kaun-te-ya |
| मुक्तसङ्गस्समाचर ॥ ३-९ ॥ | muk-ta-saṅ-gas-sa-mā-ca-ra \|\| 3-9\|\| |

| | |
|---|---|
| सहयज्ञाः प्रजास्सृष्ट्वा | sa-ha-ya-jñāḥ pra-jās-sṛṣṭ-vā |
| पुरोवाच प्रजापतिः । | pu-ro-vā-ca pra-jā-pa-tiḥ । |
| अनेन प्रसविष्यध्वम् | a-ne-na pra-sa-viṣ-yadh-vam |
| एष वोऽस्त्विष्टकामधुक् ॥ ३-१० ॥ | eṣa vo's-tviṣ-ṭa-kā-ma-dhuk ।। 3-10।। |
| देवान्भावयतानेन | de-vān-bhā-va-ya-tā-ne-na |
| ते देवा भावयन्तु वः । | te de-vā bhā-va-yan-tu vaḥ । |
| परस्परं भावयन्तः | pa-ras-pa-raṁ bhā-va-yan-taḥ |
| श्रेयः परमवाप्स्यथ ॥ ३-११ ॥ | śre-yaḥ pa-ra-ma-vāps-ya-tha ।। 3-11।। |
| इष्टान्भोगान्हि वो देवाः | iṣ-ṭān-bho-gān-hi vo de-vāḥ |
| दास्यन्ते यज्ञभाविताः । | dās-yan-te ya-jña-bhā-vi-tāḥ । |
| तैर्दत्तानप्रदायैभ्यः | tair-dat-tā-na-pra-dā-yai-bhyaḥ |

यो भुङ्क्ते स्तेन एव सः ॥ ३-१२ ॥ yo bhuṅk-te ste-na e-va saḥ || 3-12||

यज्ञशिष्टाशिनस्सन्तः ya-jña-śiṣ-ṭā-śi-nas-san-taḥ

मुच्यन्ते सर्वकिल्बिषैः । muc-yan-te sar-va-kil-bi-ṣaiḥ |

भुञ्जते ते त्वघं पापाः bhuñ-ja-te te tva-ghaṁ pā-pāḥ

ये पचन्त्यात्मकारणात् ॥ ३-१३ ॥ ye pa-can-tyāt-ma-kā-ra-ṇāt || 3-13||

अन्नाद्भवन्ति भूतानि an-nād-bha-van-ti bhū-tā-ni

पर्जन्यादन्नसम्भवः । par-jan-yād-an-na-sam-bha-vaḥ |

यज्ञाद्भवति पर्जन्यः ya-jñād-bha-va-ti par-jan-yaḥ

यज्ञः कर्मसमुद्भवः ॥ ३-१४ ॥ ya-jñaḥ kar-ma-sa-mud-bha-vaḥ || 3-14||

कर्म ब्रह्मोद्भवं विद्धि kar-ma brah-mod-bha-vaṁ viddhi

| | |
|---|---|
| ब्रह्माक्षरसमुद्भवम् । | brah-māk-ṣa-ra-sa-mud-bha-vam ǀ |
| तस्मात्सर्वगतं ब्रह्म | tas-māt-sar-va-ga-taṁ brah-ma |
| नित्यं यज्ञे प्रतिष्ठितम् ॥ ३-१५ ॥ | nit-yaṁ ya-jñe pra-tiṣ-ṭhi-tam ǀǀ 3-15ǀǀ |
| एवं प्रवर्तितं चक्रं | e-vaṁ pra-var-ti-taṁ cak-raṁ |
| नानुवर्तयतीह यः । | nā-nu-var-ta-ya-tī-ha yaḥ ǀ |
| अघायुरिन्द्रियारामः | a-ghā-yu-rin-dri-yā-rā-maḥ |
| मोघं पार्थ स जीवति ॥ ३-१६ ॥ | mo-ghaṁ pār-tha sa jī-va-ti ǀǀ 3-16ǀǀ |
| यस्त्वात्मरतिरेव स्यात् | yas-tvāt-ma-ra-ti-re-va syāt |
| आत्मतृप्तश्च मानवः । | ātma-tṛp-taś-ca mā-na-vaḥ ǀ |
| आत्मन्येव च सन्तुष्टः | ātman-ye-va ca san-tuṣ-ṭaḥ |


| | |
|---|---|
| तस्य कार्यं न विद्यते ॥ ३-१७ ॥ | tas-ya kār-yaṁ na vid-ya-te \|\| 3-17\|\| |
| नैव तस्य कृतेनार्थः | nai-va tas-ya kṛ-te-nār-thaḥ |
| नाकृतेनेह कश्चन । | nā-kṛ-te-ne-ha kaś-ca-na \| |
| न चास्य सर्वभूतेषु | na cās-ya sar-va-bhū-te-ṣu |
| कश्चिदर्थव्यपाश्रयः ॥ ३-१८ ॥ | kaś-cid-ar-tha-vya-pā-śra-yaḥ \|\| 3-18\|\| |
| तस्मादसक्तस्सततं | tas-mād-a-sak-tas-sa-ta-taṁ |
| कार्यं कर्म समाचर । | kār-yaṁ kar-ma sa-mā-ca-ra \| |
| असक्तो ह्याचरन्कर्म | a-sak-to hyā-ca-ran-kar-ma |
| परमाप्नोति पूरुषः ॥ ३-१९ ॥ | pa-ra-māp-no-ti pū-ru-ṣaḥ \|\| 3-19\|\| |
| कर्मणैव हि संसिद्धिम् | kar-ma-ṇai-va hi saṁ-sid-dhim |

| | |
|---|---|
| आस्थिता जनकादयः । | ās-thi-tā  ja-na-kā-da-yaḥ ǀ |
| लोकसंग्रहमेवापि | lo-ka-saṅ-gra-ham-e-vā-pi |
| सम्पश्यन्कर्तुमर्हसि ॥ ३-२० ॥ | sam-paś-yan-kar-tum-ar-ha-si ǀǀ 3-20ǀǀ |

*Sri Gurudev, Swami Chinmayananda, guidance was that this verse be recited three times*

| | |
|---|---|
| यद्यदाचरति श्रेष्ठः | yad-ya-dā-ca-ra-ti  śreṣ-ṭhaḥ |
| तत्तदेवेतरो जनः । | tat-tad-e-ve-ta-ro  ja-naḥ ǀ |
| स यत्प्रमाणं कुरुते | sa  yat-pra-mā-ṇaṁ  ku-ru-te |
| लोकस्तदनुवर्तते ॥ ३-२१ ॥ | lo-kas-ta-da-nu-var-ta-te ǀǀ 3-21 ǀǀ |

*Sri Gurudev, Swami Chinmayananda, guidance was that this verse be recited three times*



| | |
|---|---|
| ॐ तत्सत् | om tat-sat |
| इति श्रीमद्भगवद्गीतासु | iti śrīmad-bhaga-vad-gī-tā-su |
| उपनिषत्सु | upa-ni-ṣat-su |
| ब्रह्मविद्यायां | brahma-vid-yā-yāṁ |
| योगशास्त्रे | yoga-śās-tre |
| श्रीकृष्णार्जुनसंवादे | śrī-kṛṣ-ṇār-juna-saṁ-vā-de |
| कर्म योगो नाम | karma yo-go nā-ma |
| तृतीयोऽध्यायः। | tṛ-tī-yo'dhyā-yaḥ ǀ |
| ॐ हरिःॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī guru-bhyo namaḥ |
| हरिः ॐ | hariḥ om |

| | |
|---|---|
| सर्वधर्मान्परित्यज्य | sar-va-dhar-mān-pari-tyaj-ya |
| मामेकं शरणं व्रज। | mām-ekaṁ śara-ṇaṁ vra-ja ǀ |
| अहं त्वा सर्वपापेभ्यः | ahaṁ tvā sar-va-pā-pebh-yaḥ |

मोक्षयिष्यामि मा शुचः ॥ १८-६६ ॥ mokṣa-yiṣ-yā-mi mā śu-caḥ || 18-66||